इति हेमचन्द्रः ॥ ( यथा, महाभारते । १ । १२८ । ५० ।
"विहारावसथेष्वेव वीरा वासमरोचयन् ॥" )
वासकः । इति शब्दरत्नावली ॥ सुगन्धिः । इति वासधात्वर्थदर्शनात् ॥ * ॥ स्थानविशेषे वासस्य कर्त्तव्याकर्त्तव्यत्वं यथा,—
देवयान्युवाच ।
"वेदाहं तात बालापि कार्य्याणान्तु गतागतिम् ।
क्रोधे चैवाभिवादे वा वेद चापि बलाबलम् ॥
शिष्यस्याशिष्यवृत्तेर्हि न क्षन्तव्यं बुभूषता ।
तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते ॥
पुंसो येनाभिनन्दन्ति वृत्तेनाभिजनेन च ।
न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥
ये त्वेवमभिजानन्ति वृत्तेनापि जनेन च ।
तेषु साधुषु वस्तव्यं स वासः श्रेय उच्यते ॥"
इति मात्स्ये २८ अध्यायः ॥ * ॥
अपि च ।
"धार्म्मिकैरावृते ग्रामे न व्याधिबहुले भृशम् ।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते ॥
हिमवद्विन्ध्ययोर्मध्यं पूर्व्वपश्चिमयोः शुभम् ।
मुक्त्वा समुद्रयोर्देशं नान्यत्र निवसेत् द्विजः ॥
अर्द्धक्रोशान्नदीकूलं वर्जयित्वा द्विजोत्तमः ॥
नान्यत्र निवसेत् पुण्यं नान्त्यजग्रामसन्निधौ ॥
न संवसेच्च पतितैर्न चण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥"
इति कौर्म्मे उपविभागे २५ अध्यायः ॥
वासः, [ स् ] क्ली, ( वस्यतेऽनेनेति । वस आच्छादने + "वसेर्णित् ।" उणा० ४ । २१७ । इत्यसुन् । स च णित् । ) वस्त्रम् । इत्यमरः ॥ (यथा, मनौ । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥")
पत्रकम् । इति राजनिर्घण्टः ॥
वासकः, पुं, (वासयतीति । वासि + ण्वुल् ।) वृक्षविशेषः । वाकस इति भाषा । तत्पर्य्यायः । वैद्यमाता २ सिंही ३ वासिका ४ वृषः ५ अटरुषः ६ सिंहास्यः ७ वाजिदन्तकः ८ । इत्यमरः ॥ वाशा ९ वाशिका १० वृशः ११ अटरूषः १२ वाशकः १३ । इति तट्टीका ॥ वासा १४ वासः १५ वाजी १६ वैद्यसिंही १७ मातृसिंही १८ । इति शब्दरत्नावली ॥ वासका १९ सिंहपर्णी २० । इति जटाधरः ॥ सिंहिका २१ भिषङ्माता २२ वसादनी २३ सिंहमुखी २४ कण्ठीरवी २५ श्वेतकर्णी २६ वाजिदन्ती २७ नासा २८ पञ्चमुखी २९ सिंहपत्री ३० मृगेन्द्राणी ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कासरक्तपित्तकामलाकफवैकल्यज्वरश्वासक्षयनाशित्वञ्च । तत्पुष्पगुणाः । कटुपाकित्वम् । तिक्तत्वम् । कासक्षयहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वासको वासिका वासा भिषङ्माता च सिंहिका ।
सिंहास्यो वाजिदन्तः स्यादाटरुषोऽटरूषकः ॥
आटरूषो वृषो ताम्रः सिंहपर्णश्च स स्मृतः ।
वासको वातकृत् स्वर्य्यः कफपित्तास्रनाशनः ॥
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृड़र्त्तिहृत् ।
श्वासकासज्वरच्छर्द्दिमेहकुष्ठक्षयापहः ॥"
इति भावप्रकाशः ॥ * ॥
नागाङ्गविशेषः । यथा,—
"मनं हरोऽथ कन्दर्पश्चारुनन्दन एव च ।
चत्वारो वासका: प्रोक्ताः शङ्करेण स्वयं पुरा ॥"
केषाञ्चिन्मते नामान्यपि पृथक् ।
"विनोदो वरदश्चैव नन्दः कुमुद एव च ।
चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः ॥"
इति सङ्गीतदामोदरः ॥
( वासरः । इति वासकसज्जाशब्दार्थे आलङ्कारिकाः ॥)
वासकर्णी, स्त्री, यज्ञशाला । इति शब्दरत्नावली ॥
वासकसज्जा, स्त्री, ( वासके प्रियसमागमवासरे सज्जतीति । सज्ज + अच् । टाप् । यद्वा, वासकं वासवेश्म सज्जयतीति । सज्जि + अण् । टाप् । ) स्वीयादिनायिकाभेदः । ( यथा, गीतगोविन्दे । ६ । ८ ।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥" )
तस्या लक्षणं यथा । अद्य मे प्रियवासर इत्थं निश्चित्य या सुरतसामग्रीं सज्जीकरोति सा वासकसज्जा । वासको वासरः । अस्याश्चेष्टा मनोरथसखीपरिहासदूतीप्रश्नसामग्रीविधानमार्गविलोकनादयः । मुग्धावासकसज्जा यथा,
"हारं गुम्फति तारकातिरुचिरं गृह्णाति काञ्चीलतां
दीर्घं न्यस्यति किन्तु तत्र बहुलं स्नेहं न दत्ते पुनः ।
आलीनामिति वासकस्य रजनौ कामाद्रुरूपाः क्रियाः
साचिस्मेरमुखी नवोढ़सुमुखी दूरात् समुद्वीक्षते ॥"
मध्या वासकसज्जा यथा,—
"शिल्पं दर्शयितुं करोति कुतुकात् कह्लारहारस्रजं
चित्रप्रेक्षणकैतवेन किमपि द्वारं समुद्वीक्षते ।
शय्याद्याभरणं नवं सहचरी भूषाजिगीषामिषादित्थं पद्ममुखी प्रतीक्ष्य चरितं स्मेराननोऽभूत् स्मरः ॥"
प्रौढ़ा वासकसज्जा यथा,—
"न्यस्तं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्द्दिनम् ॥"
मनोरथश्च यथा,—
"आवयोरङ्गयोर्देहे भूयो विरहपल्लवः ।
अद्वैते च स्मितस्मीतं न स्यादन्योन्यवीक्षणम् ॥"
परकीया वासकसज्जा यथा,—
"स्वश्रूं स्वापयितुं छलेन च तिरोधत्ते प्रदीपाङ्कुरान्
धत्ते सौधकपोतपोतनिनदैः साङ्केतिकं चेष्टितम् ।
शश्वत्पार्श्वविवर्त्तिताङ्गलतिकं लोलत्कपोलद्युति
क्वापि क्वापि कराम्बुजं प्रियधिया तल्पान्तिकं न्यस्यति ॥"
इति रसमञ्जरी ॥
( तथाच साहित्यदर्पणे । ३ । ८६ ।
"कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥")
वासका, स्त्री, ( वासक + टाप् । ) वासकवृक्षः । इति जटाधरः ॥
वासगृहं, क्ली, ( वासाय गृहम् । ) गर्भागारम् । इत्यमरः ॥ "हे गृहमध्यभागे शयनगृहे च गृहान्तर्गृहे हत्के निर्व्वातत्वात् गर्भ इवागारं गर्भागारम् । वासाय गृहं वासगृहम् । वासवेश्मादि चात्र ।" इति भरतः ॥ (यथा, वृहत्संहितायाम् । ५३ । ७० ।
"वासगृहाणि च विन्द्यात्
विप्रादीनामुदग्दिशाद्यानि ।
विशतां च यथा भवनम्
भवन्ति तान्येव दक्षिणतः ॥")
वासतः, पुं, ( वास्यते इति । वाश शब्दे + बाहुलकात् अतच् । ) गर्द्दभः । इति शब्दरत्नावली ॥
वासतेयी, स्त्री, ( वसतौ साधुरिति । वसति + "पथ्यतिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् । ) रात्रिः । इति त्रिकाण्डशेषः ॥ (वसतिसाधुमात्रे, त्रि । यथा, भट्टौ । ४ । ८ ।
"वनेषु वासतेयेषु निवसन् पर्णसंस्तरः ।
शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे ॥")
वासनं, क्ली, ( वास्यते इति । वासि + ल्युट् । ) धूपनम् । वारिधानी । वस्त्रम् । इति मेदिनी । ने, १२६ ॥ वासः । इति शब्दरत्नावली ॥ ज्ञानम् । इति धरणिः ॥ निक्षेपाधारः । यथा, याज्ञवल्क्यः ।
"आधिसीमोपनिक्षेपजड़बालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह ॥"
उपनिक्षेपस्तु ।
"वासनस्थमनाख्याय समुद्रं यद्विधीयते ॥"
इति नारदोक्तेः ॥
वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रं ग्रन्थ्यादियुतम् । इति व्यवहारतत्त्वम् ॥ वसनसम्बन्धिनि, त्रि ॥ (वसनेन क्रीतमिति । वसन + "शतमानविंशतिकसहस्रवसनादण् ।"५।१।२७। इति अण् । वसनेन क्रीते च, त्रि ॥ )
वासना, स्त्री, ( वासयति कर्म्मणा योजयति जीवमनांसीति । वस + णिच् + युच् । टाप् । ) प्रत्याशा । ( यथा, भागवते । २ । २ । २ ।
"शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः ।